दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-338

1

01.10.2024 मंगलवासरः वि.सं. २०८० आश्विन चतुर्दशी आश्विन 16 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## जमैका-देशस्य प्रधानमन्त्री एन्ड्र-होल्नेस् भारतस्य चतुर्दिवसीयायां यात्रायां नवदिल्लीं प्राप्तवान्

**हिमसंस्कृतवार्ताः।** जमैका-देशस्य प्रधानमन्त्री एन्ड्र-होल्नेस् भारतस्य चतुर्दिवसीयायां यात्रायां नवदिल्लीं प्राप्तवान् । जमैका-देशस्य प्रधानमन्त्र्याः भारतस्य एषा प्रथमा द्वैपाक्षिकयात्रा अस्ति। प्रधानमन्त्री नरेन्द्रमोदी जमैका-देशस्य प्रधानमन्त्री च अनेकवारं मिलितवन्तौ । द्वावेव नेतारौ अद्य प्रतिनिधि-स्तरीयां वार्ता करिष्यतः । द्विपक्षीय-सहयोगं वर्धयितुं एम्. ओ. यू. इति अनेकानि सन्धिपत्राणि हस्ताक्षरितानि भवितुम् अर्हन्ति। प्रधानमन्त्री एन्ड्र-होल्नेस् राष्ट्रपतिना



द्रौपदीमुर्मु-वर्यया, उपराष्ट्रपतिना जगदीपधनखड़ेन च सह अन्यैः गणमान्यजनैः सह सम्मिल्य व्यापारोद्योग-नेतृभिः सह सम्वादं करिष्यति। अवधेयं यत् भारत-जमैका-देशयोः दृढः ऐतिहासिकः सांस्कृतिकः च सम्बन्धः अस्ति, यः तेषां संयुक्त औपनिवेशिक-भूतकालस्य, लोकतन्त्रस्य स्वातन्त्र्यस्य च मूल्यानां, क्रिकेट्-क्रीडायाम् उत्साहस्य च प्रतिविम्बम् द्योतयति । इयं यात्रा द्वैपाक्षिकवन्धान् सुदृढं करिष्यति, आर्थिकसहयोगं वर्धयिष्यति तथा च जमैका-भारतयोः मध्ये दीर्घकालीन सम्बन्धं सुदृढं करिष्यति इति अपेक्ष्यते।

## बिहारे कोसी-गण्डक-जलावरोधात् बिहारस्य क्षेत्रेषु जलं प्रविष्टम्

हिमसंस्कृतवार्ताः। बिहारे कोसी-गण्डक-जलावरोधात् त्यक्तेन जलेन अनेकेषु बिहारस्य क्षेत्रेषु जलं प्रविष्टम्। पश्चिमी चंपारण, पूर्वी चंपारण, गोपालगंज, सुपौल, मधुबनी, सहरसा, सीतामढ़ी, शिओहरादि समेत्य राज्यस्य षोडश मण्डलानि जलाप्लवेन प्रभवितानि जातानि । अस्माकं संवाददात्रा ज्ञापितवान् यत् पश्चिमचम्पारण, सीतामढ़ी, दरभंगा, शिओहर इत्येतेषु केचन ग्रामाः तटबन्ध-भङ्गस्य अनन्तरं आकस्मिकरूपेण जलागमनेन जलमग्नाः सन्ति। राज्ये जलप्रलयस्य भयावहस्थिर्ति दृष्ट्वा रांची-वाराणसीभ्यां च राष्ट्रिय आपत् मोचन दलस्य षट् अतिरिक्तदलानि आनीतानि सन्ति। जलाप्लव प्रभावित क्षेत्रेषु उद्धार कार्याणि तीव्रगत्या प्रचलन्ति । जलप्लावस्य अनन्तरं विस्थापिताः जलाप्लवपीडिताः सामुदायिकपाकशालासु भोजनं प्राप्नुवन्ति।

## प्रतिष्ठिताभिनेता मिथुन चक्रवर्ती दादा साहेब फाल्के पुरस्कारेण सम्मानितो भविष्यति



**हिमसंस्कृतवार्ताः।** प्रतिष्ठिताभिनेता मिथुन चक्रवर्ती आगामि मासे सप्ततितमे राष्ट्रिय चलचित्र- पुरस्कार-समारोहे दादा साहेब फाल्के पुरस्कारेण सम्मानितो भविष्यति । सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः एकस्मिन् सामाजिक संदेशपटले इमां घोषणां कुर्वन् प्रोक्तवान् यत् कोलकातानगरात् आरभ्य चलच्चित्राणां उन्नतशिखरं यावत् मिथुन-दा इत्यस्य उल्लेखनीया चलच्चित्रयात्रा समाजं प्रेरयति । सः प्रोक्तवान् यत् दादा-साहेब फाल्के-चयन-समित्या भारतीय चलचित्र-जगति तस्य लब्ध-प्रतिष्ठित-योगदानाया श्री-चक्रवर्ति-वर्याय भारतीय-चलच्चित्रस्य एषः शीर्षपुरस्कारः प्रदातुं निर्णयः स्वीकृतः अस्ति। प्रधानमन्त्री नरेन्द्र मोदी मिथुन- चक्रवर्तिने दादा-साहेब फाल्के पुरस्कारेण सम्मानितं भवितुं वर्धापनं प्रायच्छत् । एकस्मिन् सार्वजनिक-संदेशमाध्यमेन, श्री-मोदी प्रोक्तवान्, तेन इदं विज्ञाय प्रसन्नता अनुभूयते यत् मिथुन चक्रवर्ती प्रतिष्ठितेन फाल्के पुरस्कारेण सम्मानितः कृतः अस्ति ।

## नेपाले अनवरतवृष्ट्या जलप्रलयेन, भूस्खलनेन, जलप्लावनेन च द्विनवत्यधिकैकशत जनाः मृत्युमुपगताः



नेपाले अनवरतवृष्ट्या जलप्रलयेन, भूस्खलनेन, जलप्लावनेन च द्विनवत्यधिकैकशत जनाः मृत्युमुपगताः, अन्ये च त्रिंशत् जनाः लुप्ताः सन्ति। नेपालदेशस्य गृहमन्त्रालयस्य प्रवक्ता ऋषिराम तिवारी प्राकृतिकापदायां चतुर्नवत्यधिकैक शतं जनाः व्रणिताः इति सूचितवान्। सः अवदत् यत् सर्वेषां दलानां अन्वेषण, उद्धारकार्याणां च माध्यमेन प्रायः सार्द्ध चतुःसहस्रं आपदाप्रभाविताः जनाः उद्धारिताः।

## नवदिल्ल्याम् अटल बिहारी वाजपेयी- आयुर्विज्ञान-संस्थानस्य, डॉ. राम मनोहर लोहिया-चिकित्सालयस्य च दशमं दीक्षान्तसमारोहं सम्बोधितवती राष्ट्रपतिः



हिमसंस्कृतवार्ताः। राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया गतसायं नवदिल्ल्याम् अटल बिहारी वाजपेयी- आयुर्विज्ञान-संस्थानस्य, डॉ. राम मनोहर लोहिया-चिकित्सालयस्य च दशमं दीक्षान्तसमारोहं सम्बोधितवती । स्वकीये संबोधने तया प्रोक्तं यत् सर्वैः इदं ध्यातव्यं यत् चिकित्सकाः रुग्णानां जीवनरक्षणे यथासंभवम् उपायान कुर्वन्तीति, परञ्च तथापि काप्यप्रिया घटना भवेत् तदा चिकित्सकैः चिकित्सालयस्य कर्मचारिभिश्च सह दुर्व्यवहारः न भवितव्यः । सा प्रोक्तवती यत् क्रोधिताः भूत्वा यदा-कदाचित् रुग्णानां परिजनाः स्वास्थ्यकर्मिभिः सह दुर्व्यवहारं कुर्वन्ति । तेषाम् एतादृशः व्यवहारः सर्वथा निन्दनीयः अस्ति । अस्मिन् अवसरे केंद्रीय-स्वास्थ्य-मंत्री जे.पी. नड्डावर्यं समेत्य अन्ये गणमान्यजनाः अपि उपस्थिताः आसन् ।

## विभिन्नाखिल-भारतीय-सेवासु भारतीयारक्षि-सेवायाः स्वकीयम् अद्वितीय-महत्वम् वर्तते-राष्ट्रपतिः

भारतीय-आरक्षि-सेवायाः त्रयोविंशत्युत्तर-द्विसहस्रतमस्य परिवीक्षाधीनानाम् एकेन समूहेन राष्ट्रपति भवने राष्ट्रपतिना द्रौपदी-मुर्मु- वर्यया सह मेलनं कृतमस्ति । परिवीक्षाधीनान् संबोधयन्त्या राष्ट्रपतिना मुर्मु- वर्यया प्रोक्तं यत् विभिन्नाखिल-भारतीय-सेवासु भारतीयारक्षि-सेवायाः स्वकीयम् अद्वितीय-महत्वम् वर्तते। राष्ट्रपतिना प्रोक्तं यत् विधि-व्यवस्थे न केवलं शासनस्य आधारशिले स्तः, अपितु एते आधुनिकराज्यस्य आधाररूपेण स्थीयेते। मुर्मु-वर्यया प्रोक्तं यत् आगामि वर्षेषु भारतं नवीनोन्नर्ति यावत् गन्तुं लक्ष्यं कामयति, तस्मिन् समये भारतीय-आरक्षि-सेवा-अधिकारिणां भूमिका इतोऽपि महत्वपूर्णा भविष्यति।

### गीतोपदेशः

**ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।**
**सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥**

**शब्दार्थ-** ततः – तत्पश्चात्; शङ्खाः – शंख; भेर्यः – बड़े-बड़े ढोल, नगाड़े; च – तथा; पणव-आनक – ढोल तथा मृदंग; गोमुखाः – शृंग; सहसा – अचानक; एव – निश्चय ही; अभ्यहन्यन्त – एकसाथ बजाये गये; सः – वह; शब्दः – समवेत स्वर; तुमुलः – कोलाहलपूर्ण; अभवत् – हो गया।

**भावार्थ**

तत्पश्चात् शंख, नगाड़े, बिगुल, तुरही तथा सींग सहसा एकसाथ बज उठे। वह समवेत स्वर अत्यन्त कोलाहलपूर्ण था।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## जम्मू-कश्मीरे तृतीयान्तिमचरणाय विधानसभा निर्वाचनाय अद्य मतदानम्

जम्मू-कश्मीरे तृतीयान्तिमचरणाय विधानसभा निर्वाचनाय अद्य मतदानं भविष्यति। सुचारुरीत्या, शान्तिपूर्णतया, घटनां बिनैव च मतदानस्य कृते विस्तृतसुरक्षाव्यवस्था कृता अस्ति। अस्मिन् चरणे सप्तमण्डलानां चत्वारिंशत् विधानसभाक्षेत्राणि निर्वाचनसमरांगणे सन्ति, येषु, षोडश कश्मीरमण्डले, चतुर्विंशति जम्मूक्षेत्रे च सन्ति। अस्मिन् चरणे पञ्चदशोत्तर चतुःशतं अभ्यर्थीनां भाग्यस्य निर्णयः ऊनचत्वारिंशत् लक्षाधिकाः मतदातारः करिष्यन्ति। मतदानं प्रातः सप्त वादनादारभ्य सायं षड् वादनं यावत् भविष्यति। मतगणना हरियाणा राज्येन सहैव अक्टोबर् मासस्य अष्टमे दिनाङ्के भविष्यति।

# HP NEWS: अहं काङ्ग्रेसस्य समर्पितः कार्यकर्ता, राज्ये दलस्य निर्देशान् विचारधाराः च कार्यान्वितुं मूलभूतसिद्धान्तैः सह अग्रे गन्तुं च अस्माकं दायित्वम्- विक्रमादित्यसिंहः



**हिमसंस्कृतवार्ताः- शिमला।** दिल्लीनगरे दलस्य शीर्षनेतृत्वं मिलित्वा हिमाचलं प्रत्यागतः लोकनिर्माण- नगरविकासमन्त्री विक्रमादित्यसिंहः अवदत् यत् पथविक्रेतॄणां विषये दत्तस्य वक्तव्यस्य राजनैतिकं साम्प्रदायिकं च वर्णं दातुं प्रयत्नः कृतः। तस्य वचनं दुर्निरूपितम् आसीत्। विक्रमादित्यः अवदत्- पथविक्रेता आजीविकासंरक्षणं पथविक्रेतृविनियमन- २०१४ इत्यत्र पञ्जीकरणस्य प्रावधानम् अस्ति।

सोमवासरे शिमलानगरे पत्रकारसम्मेलने सः अवदत् यत् अहं काङ्ग्रेसपक्षस्य समर्पितः कार्यकर्ता अस्मि। दलस्य निर्देशान् अग्रे नेतुम्, दलस्य निर्देशान् विचाराधाराश्च राज्ये कार्यान्वितुं, दलस्य मूलभूतसिद्धान्तैः सह अग्रे गन्तुम् अस्माकं दायित्वम् अस्ति। पथविक्रेतॄणां विषये सर्वपक्षीयसमितिः निर्मिता अस्ति। सर्वेषां व्यापारिणां समानाः नियमाः भविष्यन्ति इति द्रष्टव्यम्। उद्योगमन्त्री हर्षवर्धनचौहानस्य अध्यक्षतायां ३ अक्तूबर दिनाङ्के समितिसभा भविष्यति। कस्यापि राज्यस्य, कस्यापि धर्मस्य, जात्याः वा व्यक्तिः आजीविकार्थं हिमाचलम् आगन्तुं शक्नोति। राज्यस्य आन्तरिकसुरक्षाविषये अपि पुनः उक्तवान्। शीर्षनेतृत्वाय स्थितिः, अधिनियमस्य प्रावधानाः च सूचिताः सन्ति। शीर्षनेतृत्वं पञ्जीकरणस्य विषये रुष्टः नास्ति। विक्रमादित्यः शीर्षनेतृत्वेन सः देहलीम् आहूतः इति विषयं अनुचितम् इति उक्त्वा दिल्लीं गन्तुं तस्य योजना पूर्वमेव निश्चिता इति अवदत्। रेलवेमण्डलेन सह तस्य समागमः निर्धारितः आसीत्। शिमलाविधानसभायाः समीपे उड्डयनमार्गस्य कृते रेलवेमण्डलात् अनापत्तिः (एनओसी) प्राप्तव्यम् आसीत्। अतः सः देहलीनगरं गतः।

## मम उत्तरदायित्वं केवलं शीर्षनेतृत्वं, मुख्यमन्त्रिणं, अध्यक्षं च प्रति

मुख्यसंसदीयसचिवस्य (सीपीएस) संजयः अवस्थी इत्यस्य परामर्शेण सम्बद्धस्य प्रश्नस्य उत्तरे विक्रमादित्यः अवदत् यत् तस्य उत्तरदायित्वं केवलं शीर्षनेतृत्वं, मुख्यमन्त्रिणं, राज्यस्य अध्यक्षं च प्रति एव अस्ति। एतदतिरिक्तं कस्यापि संवैधानिकस्य असंवैधानिकस्य वा संस्थायाः प्रति उत्तरदायित्वं नास्ति। वस्तुतः कस्यचित् मन्त्रिणः नाम न कृत्वा अवस्थी उक्तवान् आसीत् यत् यदि भवतः महत् दायित्वं प्राप्तम् अस्ति तर्हि भवतः अपि महत् चिन्तनं कर्तव्यं भविष्यति। ७० लक्षजनसंख्यायाः स्वरं उत्थापयितुं तस्य दायित्वम् इति उक्तवान्। सः अस्मात् उत्तरदायित्वात् न लज्जयिष्यति। यदा यदा हिमाचलस्य रुचिः उपरि आगमिष्यति तदा तदा सः स्वरम् उत्थापयति एव। वीरभद्रसिंहस्य प्रतिमायाः रिजस्थलम् इत्यत्र स्थापनस्थानस्य चयनस्य नगरनिगमस्य निर्णयस्य सः स्वागतं कृतवान्।

# National Kurash Championship 2024: हिमाचलस्य ९० सदस्यीयदलस्य १२ तमायै राष्ट्रियकुराशस्पर्धायै घोषणा




**हिमसंस्कृतवार्ताः - शिमला।** १२ तमायाः राष्ट्रियकुराशप्रतियोगितायाः कृते हिमाचलप्रदेशस्य ९० सदस्यीयदलस्य घोषणा कृता अस्ति। अस्मिन् दले सोलनतः २५, मण्डीतः २३, कुल्लुतः १६, शिमलातः १०, सिरमौरतः २, काङ्गड़ातः १०, चम्बातः २ क्रीडकाः सन्ति। बालकानां प्रशिक्षकः मुकुलशर्मा, बालिकानां प्रशिक्षिका च मीनाशर्मा वर्तते, दलप्रबन्धकाः भूपिन्दरकुमारः, संजयकुमारः च भविष्यन्ति। इयं सूचना हिमाचलप्रदेश-कुराशसंघस्य महासचिवः वीरेन्द्रसिंहधौलटा अवदत्।

सः अवदत् यत् अस्मिन् समये हिमाचलप्रदेशे राष्ट्रियकुराशप्रतियोगितायाः आयोजनं भवति, यस्मिन् २२ राज्येभ्यः ७०० क्रीडकाः भागं गृह्णन्ति। अस्याः प्रतियोगितायाः आयोजनं विद्यावती अन्ताराष्ट्रीयविद्यालये, मलकवालम्, नूरपुरम्, काङ्गड़ा इत्यत्र २ अक्तूबरतः ३ अक्टोबरपर्यन्तं भविष्यति। अस्याः प्रतियोगितायाः समापनसमये विधानसभाध्यक्षः कुलदीपसिंह पठानिया मुख्यातिथिरूपेण उपस्थितः भविष्यति। दलाय परमाध्यक्षः कौशल मंगटा, अध्यक्षः डॉ. सुरेन्द्र कुल्ला, उपाध्यक्षः धनीरामः, कोषाध्यक्षः हरदेव सिंहः सर्वेभ्यः क्रीड़केभ्यः शुभकामनाः अयच्छन्।

# CM Sukhu: ट्राउट-मत्स्य-उत्पादने हिमाचलं देशस्य शीर्षस्थाने- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्ये गतवर्षस्य तुलनायां १५.७० प्रतिशतं ट्राउट् मत्स्यस्य उत्पादनं वर्धितम्। राज्ये ट्राउट-उत्पादनं अभिलेखस्तरं प्राप्तवान् अस्ति। सः अवदत् यत् २०२२-२३ तमे वर्षे राज्ये ट्राउट-मत्स्यस्य उत्पादनं ११७०.५० मीट्रिकटनम् आसीत्, यत् २०२३-२४ वर्षे १३८८ मीट्रिकटनस्य आकङ्क्षाम् अतिक्रान्तम् अस्ति। यत्र २०२१-२२ तमे वर्षे ट्राउट- मत्स्यस्य उत्पादनं ९१३.५० मीट्रिकटनम् आसीत्। मुख्यमन्त्री उक्तवान् यत् विगतेषु वर्षेषु हिमाचलम् ट्राउट-कृषिक्षेत्रे अग्रणीराज्यरूपेण उद्भूतः अस्ति, अधुना देशस्य सर्वोत्तमराज्यं जातम्। अद्यत्वे राज्यस्य सहस्राणान कृषकाणां कृते ट्राउट- कृषिः आयस्य उपयुक्तः स्रोतः अभवत्। सः अवदत् यत् राज्ये सहस्रशः परिवाराः स्वजीविकायाः कृते मत्स्यपालने आश्रिताः सन्ति, अतः राज्यसर्वकारः राज्ये मत्स्यस्य उत्पादनस्य प्रवर्धनार्थं नीतिं निर्मातुम् गच्छति। मुख्यमन्त्री उक्तवान् यत् सर्वकारीयक्षेत्रे नव ट्राउट-हैचरी-संस्थाः, निजीक्षेत्रे षट् ट्राउट-हैचरी-संस्थाः च प्रचलन्ति, ये मत्स्यपालकानां कृते बीजानि प्रदास्यन्ति। एतदतिरिक्तं मत्स्यविभागः मत्स्यपालकानां कृते ट्राउट-पालनस्य आधुनिक-प्रविधिभिः सम्बद्धं प्रशिक्षणमपि प्रदाति। शिमलामण्डलस्य दूरस्थे क्षेत्रे डोडरा- क्वार इत्यत्र प्रथमवारं जनानां कृते विशेषप्रशिक्षणशिबिरस्य आयोजनं कृतम्।

## चण्डीगढे, पञ्चतारकहोटेलेषु च ट्राउट्-मत्स्यस्य महती याचना वर्तते

मुख्यमन्त्री उक्तवान् यत् कुल्लू- मण्डी- मण्डलेषु ट्राउट-पालनं वाणिज्यिकस्तरं प्राप्तम् अस्ति। चण्डीगढ-दिल्ली-नगरयोः पञ्चतारकहोटेलेषु ट्राउट-मत्स्यस्य महती याचना वर्तते। राज्यसर्वकारः मत्स्यजीविभ्यः उच्चगुणवत्तायुक्तं ट्राउट् ब्रूड स्टॉक, रेनबो ट्राउट बीजं च प्रदातुं कुल्लू मण्डलस्य पतलीकुहलम् इत्यत्र ट्राउट् ब्रूड बैंकं स्थापयितुं अपि विचारयति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे संस्कृतसम्भाषणशिविरस्य समापनसमारोहः अनुष्ठितः



**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, लखनऊ।** केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे शिक्षाशास्त्रविद्याशाखायां लोकभाषा- प्रचारसमितिः एवं केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरः इत्यनयोः सहयोगेन दशदिवसात्मकसंस्कृत- सम्भाषणशिविरस्य समापनसमारोहः आयोजितः। शिक्षाशास्त्रविद्याशाखायाः



वरिष्ठाचार्याणां प्रो. देवीप्रसादद्विवेदीमहोदयानाम् आध्यक्षे सामारोहोऽयम् अनुष्ठितः। अस्मिन् समारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविद्याशाखायाः अधिष्ठातारः आचार्याः प्रो. लोकमान्यमिश्रवर्याः उपस्थिताः आसन्। कार्यक्रमस्यास्य मुख्यातिथयः आचार्याः भारतभूषणत्रिपाठीवर्याः संस्कृतभाषायाः सर्वाः भाषाः उद्भूताः सन्ति। अतः ज्ञानस्य निधिरेव ही संस्कृतभाषा। कार्यक्रमेऽस्मिन् शाखायाः आचार्याः प्रो. गणेशशंकरविद्यार्थीमहोदयाः, डॉ. महेशकुमारपारीकमहोदयाः, डॉ. ओमप्रकाशवर्मामहोदयाः, डॉ. संध्या त्रिपाठीमहोदयाश्च उपस्थिताः आसन्। संस्कृतसम्भाषणशिविरस्य सञ्चालकाः संयोजकाश्च विद्याशाखायाः सहायकाचार्याः डॉ. रुद्रनारायणनरसिंहमिश्रमहोदयाः शिविरस्य प्रतिवेदनं प्रस्तुतं कृतवन्तः। समारोहे अस्मिन् शिक्षाशास्त्रप्रथमसत्रार्द्धस्य सर्वे छात्राध्यापकाः छात्राध्यापिकाश्च प्रतिभागं कृतवन्तः। अन्ते पञ्चलघुनाटकानामपि मञ्चनमभवत्।

# 'हिमाचलम् इव प्रतिज्ञानाम्ना हरियाणाप्रदेशं वञ्चयितुम् इच्छति काङ्ग्रेसदलम्' जयरामठाकुरः



**हिमसंस्कृतवार्ताः - शिमला।** विपक्षनेता जयरामठाकुरः अवदत् यत् हिमाचलम् इव काङ्ग्रेसदलं मिथ्याप्रतिज्ञानामधेयेन हरियाणाप्रदेशं वञ्चयितुं प्रयतते। परन्तु हिमाचलप्रदेशे काङ्ग्रेसस्य प्रतिज्ञानां मिथ्यात्वं उजागरितम् अधुना स्थितिः एतादृशी अस्ति यत् हरियाणासहितस्य देशस्य जनाः काङ्ग्रेसस्य मिथ्याः प्रतिज्ञाः नाङ्गीकुर्वन्ति। सर्वे जानन्ति यत् काङ्ग्रेसदलं हिमाचले मिथ्याप्रतिज्ञाः दत्त्वा सत्तां प्राप्तवान्। किन्तु ततः परं प्रत्येकं प्रतिज्ञाविरुद्धं कार्यं कृतवान्। परिस्थितेः परिवर्तनस्य नाम्ना सत्तां प्राप्य काङ्ग्रेसेन स्थितिः एतादृशी परिवर्तनं कृता यत् हिमाचलस्य जनाः वीथिषु आगत्य पुरातनदिनानि प्रत्यागन्तुम् इति वक्तुं आरब्धवन्तः यतः एतादृशे जीवने जीवनं कठिनं जातम्। प्रतिदिनं सुक्खु-सर्वकारः महार्घता कारणात् हिमाचल-जनानाम् उपरि किञ्चित् आघातं ददाति। कदाचित् विद्युत् महार्घं भवति, कदाचित् जलं महार्घं भवति। कदाचित् डीजलं महार्घं भवति, कदाचित् बसयानस्य भाटकं महार्घं भवति। कदाचित् बज्रचूर्णं (सीमेण्ट) महार्घं भवति, कदाचित् लौहयष्टिः, कदाचित् वालुका, ग्रेवलं च महार्घइ भवति। गृहनिर्माणात् आरभ्य औषधं, चिकित्सां, भोजनं च सर्वं सुक्खुसर्वकारेण करभारं आरोपयित्वा महार्घं कृतम् अस्ति। काङ्ग्रेसस्य जनविरोधी नीतीनां कारणात् हिमाचलसर्वकारस्य नेतारः तारक-अभियानस्य सूच्यां समाविष्टाः भूत्वा अपि जम्मू- कश्मीर- हरियाणाप्रदेशयोः निर्वाचनप्रचारात् दूरं स्थापिताः सन्ति।

जयरामठाकुरः अवदत् यत् यस्मिन् दिने हरियाणाप्रदेशे काङ्ग्रेसनेतारः गृहप्रदानस्य प्रतिज्ञां ददति स्म, तस्मिन् दिने हिमाचले गृहमानचित्राणां मूल्येषु पञ्चाष्टगुणं वर्धयितुं आदेशाः प्रदत्ताः आसन्। प्रधानमन्त्रिणा गत एकवर्षे हिमाचलस्य कृते एकलक्षं दशसहस्रं प्रधानमन्त्रिगृहाणि दत्तानि परन्तु सुक्खुसर्वकारः अस्मिन् अपि अवसरं पश्यति। राज्ये सत्तां प्राप्तस्य अनन्तरं सर्वकारेण प्रतिपुटं १२० रुप्यकेण बज्रचूर्णस्य मूल्यं वर्धितम्। बालुकायाः, ग्रेवलस्य च मूल्यं पृथक् पृथक् वर्धितम् अस्ति। एतादृशे सति प्रत्येकं परिवारस्य स्थायिगृहस्य स्वप्नः साकारः भविष्यति वा? यदा हिमाचले काङ्ग्रेसपक्षः सत्तां प्राप्तवान् तदा आरभ्य हिमाचले जनाः केनचित् व्रणेन वा अन्येन वा पीडिताः सन्ति, औषधं नास्ति। सर्वकारस्य अतिशयस्य स्थितिः एतादृशी अस्ति यत् जनानां कृते यत् ५ लक्षरूप्यकाणां निःशुल्कं चिकित्सां प्रदत्तं भवति स्म तत् अपि निजीचिकित्सालयेषु सर्वकारीयचिकित्सालयेषु च स्थगितम् अस्ति, सर्वकारस्य प्रमादात्, शल्यक्रियायै येषां तिथयः अपि प्राप्ताः आसन् तेषां शल्यक्रियां कर्तुं अस्वीकृतिः अभवत्। जयराम ठाकुरः अवदत् यत् यदा निर्वाचनं परितः भवति तदा जनसमूहं वञ्चयितुं कस्मिन् अपि स्तरे असत्यं वक्तुं शक्यते, एतत् काङ्ग्रेसस्य मिथ्याप्रतिज्ञाभिः सिद्धम् अभवत्। काङ्ग्रेसनेतारः अनेकेषु समूहेषु आगत्य सर्वविधं असत्यं वदन्ति। प्रथमं केचन नेतारः आगत्य जनान् मिथ्याप्रतिज्ञां दर्शयिष्यन्ति, ततः अन्येषां नेतृणाम् तथाकथितविशेषज्ञानाम् एकम् दलम् आगत्य महता विश्वासेन वक्ष्यति यत् प्रतिज्ञा-पूर्तये धनस्य अभावः नास्ति, अस्माकं अन्ताराष्ट्रीयस्तरस्य अर्थशास्त्रज्ञाः सर्वे गणितवन्तः, गृहीतवन्तः। सर्वाः धनव्यवस्थाः कृताः सन्ति। सत्तां प्राप्तमात्रेण वयं वितरणम् आरभेमः, विश्वासं कुर्वन्तु। निर्वाचनानन्तरं यदा राज्यस्य जनाः अधिनायकत्वस्य, सर्वकारस्य असफलतायाः च कारणेन दुःखं प्राप्नुयुः, तदा न कोऽपि नेता न कोऽपि विशेषज्ञः अर्थशास्त्रज्ञः हिमाचलम् आगमिष्यति। ये बृहत् नेतारः आगच्छन्ति ते कठिनसुरक्षायां परिभ्रमन्ति ततः दूरं गमिष्यन्ति, हिमाचलस्य जनान् त्यजन्तु, ते हिमाचलस्य बृहत् नेतृभ्यः अपि न मेलिष्यन्ति। जयरामठाकुरः उक्तवान् यत् काङ्ग्रेसस्य असत्यस्य दिवसाः समाप्ताः। आधुनिकप्रौद्योगिक्याः धावने हरियाणायां हिमाचलस्य असत्यं विक्रेतुं प्रयत्नः हास्यास्पदः अस्ति। अस्मिन् समये काङ्ग्रेसः हरियाणा- प्रदेशस्य जनान् वञ्चयितुं प्रयतते किन्तु असत्यं पुनः पुनः विक्रेतुं न शक्यते। सामान्यजनं त्यक्त्वा काङ्ग्रेसनेतारः अपि काङ्ग्रेसस्य प्रतिज्ञासु न विश्वसन्ति।

# संस्कृतविद्यास्थानानि- २१

## ऋग्वेदस्य ब्राह्मणे



१) ऐतरेयब्राह्मणम्

स्कन्दपुराणानुसारं भक्तेः महाचार्यस्य हारितर्षेः वंशे माण्डूकिः नाम प्रसिद्धः आचार्यः अभवत्। तस्य पत्न्याः नाम इतरा इति आसीत्। पुत्रप्राप्त्यर्थं माण्डूकिः घोरं तपः अन्वतिष्ठत्। तस्य पुत्रप्राप्तिः जाता। इतरायाः एषः पुत्रः ऐतरेयः इति नाम्ना प्रसिद्धिं गतः। बाल्यादेव एषः केवलं वासुदेव, वासुदेव इत्येवं भगवन्नाम गायति स्म। सः वेदाध्ययनं न कृतवान्। तेन सः रुष्टस्य पितुः तिरस्कारस्य भाजनम् अभवत्। तथापि अनन्तरं विष्णोः प्रसादात् सः ऐतरेयब्राह्मणस्य रचनां कृतवान्। सायणाचार्येण एषा कथा एवं दत्ता अस्ति– ऐतरेयस्य पिता यज्ञसभायां वेदाध्ययनाय ग्लायतः ऐतरेयस्य अवमानं कृतवान्। तदसहमाना इतरा स्वस्य कुलदेवतायाः मह्याः आवाहनं कृतवती। तदा महीदेवता प्रकटिता अभवत्। सा सभायाम् ऐतरेयं सिंहासने उपवेश्य तस्मै ऐतरेयब्राह्मणस्य द्रष्टृत्वं वररूपेण दत्तवती। अतः एषः ऐतरेयः 'महीदासः' इति नाम्नापि प्रसिद्धिं गतः।

ऐतरेयब्राह्मणं ऋग्वेदस्य शाकलशाखया सम्बद्धं ब्राह्मणम् अस्ति। तस्मिन् अष्ट पञ्चिकाः सन्ति। प्रत्येकं पञ्चिकायां अष्टौ अध्यायाः एवं समेत्य ४० अध्यायाः तथा २८५ कण्डिकाः सन्ति।

एतस्य ग्रन्थस्य मुख्यः विषयः सोमयागः इति। सोमयागस्य प्रकृतियागः अग्निष्टोमः तथा च उक्थ्यः, षोडशी, क्रतुः अतिरात्रः एते अग्निष्टोमस्य विकृतियागाः एतेषां सर्वेषां वर्णनं अत्र प्राप्यते। राजसूययज्ञः ऐन्द्रमहाभिषेकः पुरोहितस्य महत्त्वम् इत्यादयः महत्त्वपूर्णविषयाः विभिन्नासु पञ्चिकासु चर्चिताः। सप्तमपञ्चिकायाः तृतीये अध्याये प्रसिद्धं शुनःशेपाख्यानं (हरिश्चन्द्रोपाख्यानं) वर्तते। हरिश्चन्द्रः पुत्रकामः नारदं पर्वतनामकं ऋषिं च पुत्रप्राप्त्यर्थम् उपायं पृष्टवान्। तदा नारदः वरुणस्य आराधनं कुरु इति तम् आदिशत्। हरिश्चन्द्रः वरुणस्य आराधनं कृतवान् वरुणाय च स्वपुत्रस्य प्रत्यर्पणं प्रतिज्ञातवान्।

वरुणकृपया प्राप्तस्य पुत्रस्य रोहितः इति नामकरणं तेन कृतम्। तथापि पुत्रमोहात् तस्य वरुणाय प्रत्यर्पणं तेन यथाशक्ति विलम्बितम्। तथापि अन्ते रोहितः यदा युवा अभवत् तदा सः यज्ञे वरुणार्थं तस्य बलिदानाय सिद्धः अभवत्। एतं वृत्तान्तं श्रुत्वा रोहितः पलायनं कृत्वा वनप्रदेशम् आश्रितवान्। तदा वरुणदेवस्य शक्त्या बद्धः हरिश्चन्द्रः जलोदररोगपीडितः अभवत्। रोहितेन वने अजीगर्तनामकाय ऋषये शतं गाः दत्त्वा तस्य शुनःशेपनामकः पुत्रः बलिदानार्थं क्रीतः। तं पुत्रं सः हरिश्चन्द्रस्य यज्ञम् आनयत्। हरिश्चन्द्रस्य पुरोहिताः विश्वामित्रः वसिष्ठः जमदग्निश्च शुनःशेपस्य विशसनाय न सिद्धाः अभवन्। तदा स्वयं पिता अजीगर्तः एव तस्य विशसनार्थम् अग्रे आगतः। एतावता विश्वामित्रस्य उपदेशेन शुनःशेपेन स्तुतः वरुणः तं बन्धमुक्तम् अकरोत्। हरिश्चन्द्रस्य जलोदररोगः अपि नष्टः। पितुः लोभं दृष्ट्वा शुनःशेपः पितुः त्यागम् अकरोत्। तदा विश्वामित्रेण सः पुत्ररूपेण स्वीकृतः। तदाप्रभृति शुनःशेपस्य नाम देवरातः इति अभवत्। रोहितः यदा वने आसीत् तदा इन्द्रः तम् गतिशीलजीवनस्य उपदेशं कृतवान् आसीत्। चरैवेति चरैवेति इति सः प्रसिद्धः उपदेशः।

**आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।**
**शेते निपद्यमानस्य चराति चरतो भगः।।**
**चरैवेति चरैवेति।।**

यः कार्यहीनः आसीनो भवति तस्य भाग्यमपि निषीदते। यः ऊर्ध्वः तिष्ठति तेन सह तस्य भाग्यमपि तिष्ठति। यः निरुद्योगः केवलं शयनेन कालयापनं करोति तस्य भाग्यमपि शेते। तथापि यः सन्ततं गतिशीलः चरति तस्य भाग्यमपि वृद्धिं गच्छति अतः भवान् सर्वदा सञ्चरतु, गतीशीलो भवतु।

**चरन्वै मधु विन्दति चरन्स्वादुमुदुम्बरम्।**
**सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्।।**
**चरैवेति चरैवेति।**

सञ्चरणशीलः मधु प्राप्नोति सञ्चरणशीलः एव स्वादिष्टफलं विन्दते। सूर्यं पश्यतु सः कदापि सञ्चरणकाले तन्द्राम् आलस्यं वा न धारयति। अतः तस्य आदर्शम् अनुसृत्य भवानपि सर्वदा सञ्चारं करोतु।

ऐतरेयब्राह्मणे ३३ देवानाम् उल्लेखः प्राप्यते। अग्निर्वै देवानामवमो विष्णुश्चरमः। अग्निः देवेषु प्रथमः तथा विष्णुः सर्वश्रेष्ठः इति ऐतरेयस्य मतम्।

एतस्य ब्राह्मणस्य लेखनशैली प्रतीकात्मिका, रूपकबहुला च वर्तते। ऐन्द्रमहाभिषेकप्रसङ्गे वर्णितं आसन्द्याः रूपकम् अत्यन्तं हृदयावर्जकं रमणीयम् अस्ति।

**श्री तोडकर अभिजित**
abhitdkr9@gmail.com

# केंद्रीयान्वेषणविभागेन वञ्चनप्रकरणे षड्विंशतिसंख्यारकाः प्रमुखारोपिणः निगडिताः




हिमसंस्कृतवार्ताः। केंद्रीयान्वेषणविभागेन वैश्विक स्तरे पीड़ितानां वञ्चनप्रकरणम् अधिकृत्य विविधि- प्रवञ्चन-गतिविधिषु सम्मिलिताः अत्यधिक-संगठितस्य आन्तर्जालिकापराधस्य षड्विंशतिसंख्यारकाः प्रमुखारोपिणः निगडिताः सन्ति। केंद्रीयान्वेषणविभागेन प्रवर्तमानस्य चक्र-तृतीयमित्यभियानस्य अन्तर्गतं एकं प्रमुखं प्रौद्योगिकापराधान्तर्जालं विनष्टुं द्वात्रिंशत् स्थानेषु अन्वेषणानन्तरं एते आरोपिणः निगडिताः। केंद्रीयान्वेषणविभागेन अन्तर्जालमाध्यमेन आपराधिक गतिविधिषु पीडितानां प्रवञ्चनायां च प्रयुज्यमाणानि विविधानि विद्युञ्चालितोपकरणानि यथा मोबाइल, लैपटॉप, बित्तीयसूचनाः, संचारसूचिः चेत्यादिभिः सह पञ्चाशदुत्तर- नवशताधिक्यः सामग्र्यः अपि निगडिताः ।